# Dakshadikritam Shiva Stotram

# દક્ષાદિકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Dakshadikritam Shiva Stotram

File name : dakShAdikRRitaMshivastotram.itx

Category : shiva, bhAgavatapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 4/7/26-47||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

# દક્ષાદિકૃતં શિવસ્તોત્રમ્

દક્ષ ઉવાચ ।
શુદ્ધં સ્વધામ્ન્યુપરતાખિલબુદ્ધ્યવસ્થં
ચિન્માત્રમેકમભયં પ્રતિષિધ્ય માયામ્ ।
તિષ્ઠંસ્તયૈવ પુરુષત્વમુપેત્ય તસ્યા-
માસ્તેભવાનપરિશુદ્ધ ઇવાત્મતન્ત્રઃ ॥ ૨૬॥

ઋત્વિજ ઊચુઃ ।
તત્ત્વં ન તે વયમનઞ્જન રુદ્રશાપાત્
કર્મણ્યવગ્રહધિયો ભગવન્ વિદામઃ ।
ધર્મોપલક્ષણમિદં ત્રિવૃદધ્વરાખ્યં
જ્ઞાતં યદર્થમધિદૈવમદો વ્યવસ્થાઃ ॥ ૨૭॥

સદસ્યા ઊચુઃ ।
ઉત્પત્ત્યધ્વન્યશરણ ઉરુક્લેશદુર્ગેઽન્તકોગ્ર-
વ્યાલાન્વિષ્ટે વિષયમૃગતૃષ્ણાઽઽત્મગેહોરુભારઃ ।
દ્વન્દ્વશ્વભ્રે ખલમૃગભયે શોકદાવેઽજ્ઞસાર્થઃ
પાદૌકસ્તે શરણદ કદા યાતિ કામોપસૃષ્ટઃ ॥ ૨૮॥

રુદ્ર ઉવાચ ।
તવ વરદ વરાઙ્ઘ્રાવાશિષેહાખિલાર્થે
હ્યપિ મુનિભિરસક્તૈરાદરેણાર્હણીયે ।
યદિ રચિતધિયં માવિદ્યલોકોઽપવિદ્ધં
જપતિ ન ગણયે તત્ત્વત્પરાનુગ્રહેણ ॥ ૨૯॥

ભૃગુરુવાચ ।
યન્માયયા ગહનયાપહૃતાત્મબોધા
બ્રહ્માદયસ્તનુભૃતસ્તમસિ સ્વપન્તઃ ।
નાત્મન્ શ્રિતં તવ વિદન્ત્યધુનાપિ તત્ત્વં

સોઽયં પ્રસીદતુ ભવાન્ પ્રણતાત્મબન્ધુઃ ॥ ૩૦॥

બ્રહ્મોવાચ ।
નૈતત્સ્વરૂપં ભવતોઽસૌ પદાર્થ-
ભેદગ્રહૈઃ પુરુષો યાવદીક્ષેત્ ।
જ્ઞાનસ્ય ચાર્થસ્ય ગુણસ્ય ચાશ્રયો
માયામયાદ્વ્યતિરિક્તો યતસ્ત્વમ્ ॥ ૩૧॥

ઇન્દ્ર ઉવાચ ।
ઇદમપ્યચ્યુત વિશ્વભાવનં વપુરાનન્દકરં મનોદૃશામ્ ।
સુરવિદ્વિટ્ક્ષપણૈરુદાયુધૈર્ભુજદણ્ડૈરુપપન્નમષ્ટભિઃ ॥ ૩૨॥

પત્ન્ય ઊચુઃ ।
યજ્ઞોઽયં તવ યજનાય કેન સૃષ્ટો
વિધ્વસ્તઃ પશુપતિનાદ્ય દક્ષકોપાત્ ।
તં નસ્ત્વં શવશયનાભશાન્તમેધં
યજ્ઞાત્મન્ નલિનરુચા દૃશા પુનીહિ ॥ ૩૩॥

ઋષય ઊચુઃ ।
અનન્વિતં તે ભગવન્ વિચેષ્ટિતં
યદાત્મના ચરસિ હિ કર્મ નાજ્યસે ।
વિભૂતયે યત ઉપસેદુરીશ્વરીં
ન મન્યતે સ્વયમનુવર્તતીં ભવાન્ ॥ ૩૪॥

સિદ્ધા ઊચુઃ ।
અયં ત્વત્કથામૃષ્ટપીયૂષનદ્યાં
મનોવારણઃ ક્લેશદાવાગ્નિદગ્ધઃ ।
તૃષાર્તોઽવગાઢો ન સસ્માર દાવં
ન નિષ્ક્રામતિ બ્રહ્મસમ્પન્નવન્નઃ ॥ ૩૫॥

યજમાન્યુવાચ ।
સ્વાગતં તે પ્રસીદેશ તુભ્યં નમઃ
શ્રીનિવાસ શ્રિયા કાન્તયા ત્રાહિ નઃ ।
ત્વામૃતેઽધીશ નાઙ્ગૈર્મખઃ શોભતે
શીર્ષહીનઃ કબન્ધો યથા પૂરુષઃ ॥ ૩૬॥

લોકપાલા ઊચુઃ ।

દૃષ્ટઃ કિં નો દૃગ્ભિરસદ્ગ્રહૈસ્ત્વં
પ્રત્યગ્દ્રષ્ટા દૃશ્યતે યેન દૃશ્યમ્ ।
માયા હ્યેષા ભવદીયા હિ ભૂમન્
યસ્ત્વં ષષ્ઠઃ પઞ્ચભિર્ભાસિ ભૂતૈઃ ॥ ૩૭॥

યોગેશ્વરા ઊચુઃ ।
પ્રેયાન્ન તેઽન્યોઽસ્ત્યમુતસ્ત્વયિ પ્રભો
વિશ્વાત્મનીક્ષેન્ન પૃથગ્ય આત્મનઃ ।
અથાપિ ભક્ત્યેશ તયોપધાવતા-
મનન્યવૃત્ત્યાનુગૃહાણ વત્સલ ॥ ૩૮॥

જગદુદ્ભવસ્થિતિલયેષુ દૈવતો
બહુભિદ્યમાન ગુણયાऽऽત્મમાયયા ।
રચિતાત્મભેદમતયે સ્વસંસ્થયા
વિનિવર્તિતભ્રમગુણાત્મને નમઃ ॥ ૩૯॥

બ્રહ્મોવાચ ।
નમસ્તે શ્રિતસત્ત્વાય ધર્માદીનાં ચ સૂતયે ।
નિર્ગુણાય ચ યત્કાષ્ઠાં નાહં વેદાપરેઽપિ ચ ॥ ૪૦॥

અગ્નિરુવાચ ।
યત્તેજસાહં સુસમિદ્ધતેજા
હવ્યં વહે સ્વધ્વર આજ્યસિક્તમ્ ।
તં યજ્ઞિયં પઞ્ચવિધં ચ પઞ્ચભિઃ
સ્વિષ્ટં યજુર્ભિઃ પ્રણતોઽસ્મિ યજ્ઞમ્ ॥ ૪૧॥

દેવા ઊચુઃ ।
પુરા કલ્પાપાયે સ્વકૃતમુદરીકૃત્ય વિકૃતં
ત્વમેવાદ્યસ્તસ્મિન્ સલિલ ઉરગેન્દ્રાધિશયને ।
પુમાન્ શેષે સિદ્ધૈર્હૃદિ વિમૃશિતાધ્યાત્મપદવિઃ
સ એવાદ્યાક્ષ્ણોર્યઃ પથિ ચરસિ ભૃત્યાનવસિ નઃ ॥ ૪૨॥

ગન્ધર્વા ઊચુઃ ।
અંશાંશાસ્તે દેવ મરીચ્યાદય એતે
બ્રહ્મેન્દ્રાદ્યા દેવગણા રુદ્રપુરોગાઃ ।
ક્રીડાભાણ્ડં વિશ્વમિદં યસ્ય વિભૂમન્

તસ્મૈ નિત્યં નાથ નમસ્તે કરવામ ॥ ૪૩॥

વિદ્યાધરા ઊચુઃ ।
ત્વન્માયયાર્થમભિપદ્ય કલેવરેઽસ્મિન્
કૃત્વા મમાહમિતિ દુર્મતિરુત્પથૈઃ સ્વૈઃ ।
ક્ષિપ્તોઽપ્યસદ્વિષયલાલસ આત્મમોહં
યુષ્મત્કથામૃતનિષેવક ઉદ્વ્યુદસ્યેત્ ॥ ૪૪॥

બ્રાહ્મણા ઊચુઃ ।
ત્વં ક્રતુસ્ત્વં હવિસ્ત્વં હુતાશઃ સ્વયં
ત્વં હિ મન્ત્રઃ સમિદ્દર્ભ પાત્રાણિ ચ ।
ત્વં સદસ્યર્ત્વિજો દમ્પતી દેવતા
અગ્નિહોત્રં સ્વધા સોમ આજ્યં પશુઃ ॥ ૪૫॥

ત્વં પુરા ગાં રસાયા મહાસૂકરો
દંષ્ટ્રયા પદ્મિનીં વારણેન્દ્રો યથા ।
સ્તૂયમાનો નદઁલ્લીલયા યોગિભિ-
ર્વ્યુજ્જહર્થ ત્રયીગાત્ર યજ્ઞક્રતુઃ ॥ ૪૬॥

સ પ્રસીદ ત્વમસ્માકમાકાઙ્ક્ષતાં
દર્શનં તે પરિભ્રષ્ટસત્કર્મણામ્ ।
કીર્ત્યમાને નૃભિર્નામ્નિ યજ્ઞેશ તે
યજ્ઞવિઘ્નાઃ ક્ષયં યાન્તિ તસ્મૈ નમઃ ॥ ૪૭॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે ચતુર્થસ્કન્ધે સપ્તમાધ્યાયાન્તર્ગતં
દક્ષાદિકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૪/૭/૨૬-૪૭॥

bhAgavatapurANa . adhyAya 4/7/26-47..

Proofread by PSA Easwaran

*Dakshadikritam Shiva Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*